# संस्कृत वार्ता:

दिनाङ्क :- 21.06.2026　　　　　　　　　　प्रात: - 06:55

अथ वार्ताः

## अन्तर्राष्ट्रीय-योग-दिवसः

अद्य द्वादशः अन्ताराष्ट्रिय-योग-दिवसः **"स्वस्थवृद्धावस्थायै योगः"** इति विषयेन विश्वस्मिन् आचर्यते। मुख्यकार्यक्रमः पश्चिमबङ्गालस्य कोलकातानगरे ऐतिहासिके रेड्-रोड्-स्थले आयोज्यते। तत्र प्रधानमन्त्री common -योग-प्रोटोकॉलइति - सामान्य - योगा अभ्यासे राष्ट्रस्य नेतृत्वं विदधाति ।

-----------------------------------------

## राष्ट्रपतिः जबलपुरे योग-दिवसे

मध्यप्रदेशस्य जबलपुरनगरे अद्य राज्यस्तरीय-अन्तार्राष्ट्रीय-योग-दिवस-कार्यक्रमे राष्ट्रपतिः मुख्य-अतिथित्वेन सहभागित्वं करिष्यति । सदरस्थिते गैरीसन-ग्रोउण्ड् नाम्ना प्रांगणे कार्यक्रमः प्रातः सार्ध-सप्तवादने आरभ्यते।

-----------------------------------------

## अन्तर्राष्ट्रीय-योग-दिवसःविदेशः

अन्तार्राष्ट्रीय-योग-दिवसमालक्ष्य अनेकेषु देशेषु योगाभ्यासस्य विशेषः उत्साहः दृष्टः। कनाडादेशस्य टोरन्टो-नगरे ओण्टारियो-विधानसभायाः ऐतिहासिक-प्राङ्गणे विशालम् योग-

सत्रम् आयोजितम् । ब्राजील-देशे प्रसिद्धे अपि योग-सत्रम् आयोजितम्। डेनमार्क-देशस्य आरहुस्-नगरे योग-दिवस-समारोहः सोत्साहं सम्पन्नः। इत्थं योगस्य वैश्विक-लोकप्रियता दृष्टा ।

----------------------------------------

## सामाजिक-न्याय-मन्त्रालयस्य योगोत्सवः

अद्य नवदिल्ल्याम् भारतमण्डपम्-इत्यत्र सामाजिक-न्याय-अधिकारिता-मन्त्रालयेन विशेषः योग-दिवस-समारोहः आयोजितः। अस्मिन् कार्यक्रमे प्रायः पञ्चदशशतं वरिष्ठाः नागरिकाः सहभागित्वं कुर्वन्ति । राष्ट्रव्यापि-समारोहाणां भागत्वेन आयोजितः अयं उत्सवः "स्वस्थवृद्धावस्थायै योगः" इति राष्ट्रिय-विषयस्य अनुरूपम् अस्ति।

----------------------------------------

## एम-नेवी-मञ्चस्य उद्घाटनम्

प्रधानमन्त्री नरेन्द्रमोदी अद्य कोलकातायां आई.एन्.एस. दुनागिरि इत्यस्य, आई.एन्.एस. संशोधकस्य तथा आई.एन्.एस. अग्रय इत्यस्य नौसैनिकपोतानाम् अनावरणं करिष्यति। एतेषु पोतेषु पञ्चसप्ततिप्रतिशताधिकं स्वदेशि-सामग्रिणाम् उपयोगः कृतः।

----------------------------------------

## प्रधानमन्त्रिणः ओडिशायां सम्बोधनम्

ओडिशा-राज्यस्य मयूरभञ्ज-जनपदे रायरङ्गपुर-क्षेत्रे आयोजितायां जनसभायां प्रधानमन्त्री अवदत् यत् जनजातीय-समुदायाः भारतस्य विकासयात्रायाः सक्रिय-सहभागिनः भवन्ति। तेन राज्यस्य प्रगतिः प्रशंसिता तथा प्रायः सप्तचत्वारिंशत्सहस्र-कोटि-रूप्यकाणां विकास-परियोजनानां उद्घाटनं शिलान्यासश्च कृतः।

----------------------------------------

## नीट्- परीक्षा

नीट्-यूजी पुनर्परीक्षा अद्य आयोज्यते। परीक्षाकेन्द्रेषु कठोरसुरक्षाव्यवस्था कृता । राष्ट्रीयपात्रतासहप्रवेशपरीक्षा- नीट् यूजी २०२६ इत्यस्याः पुनर्परीक्षा अद्य आयोज्यते। एषा परीक्षा देशस्य पञ्चशतैकपञ्चाशत् नगरेषु विदेशस्य चतुर्दश नगरेषु च भवति ।

-----------------------------------------

## अश्विनी वैष्णव राजस्थान-भ्रमणम्

केन्द्रीयमन्त्री अश्विनीवैष्णवः अद्य राजस्थानराज्यस्य यात्रायाम् अस्ति। सः अनेकाः रेलपरियोजनाः उद्घाटयिष्यति तथा समर्पयिष्यति।

-----------------------------------------

## सोनोवाल-टैंकर

केन्द्रीय-जलमार्गमन्त्री सर्वानन्दसोनोवालः अवदत् यत् भारतध्वजाङ्किताः त्रयः तैलवाहकाः होर्मुजजलसन्धिं सफलतया अतिक्रम्य भारतं प्रति आगच्छन्ति। तेषु ९४ चतुर्नवति भारतीयनाविकाः सन्ति।

-----------------------------------------

## फीफा विश्वकपः

फीफाविश्वचषके नीदरलैण्ड्स्-दलेन स्वीडनदलम् पंच–एक इतिअनेन पराजितम्। ब्राजील-दलेन हैती-दलम् त्रि-शून्य इतिअनेन पराजितम्।

-----------------------------------------

## भारत ए–श्रीलंका ए क्रिकेटम्

क्रिकेटश्रृङ्खलायाः अन्तिमस्पर्धायां भारत-ए तथा श्रीलङ्का-ए दलयोः अद्य दम्बुल्लानगरे संमुखीकरिष्यतः। स्पर्धा प्रातः दशवादने आरभ्यते।

-----------------------------------------

<u>संस्कृत - साप्ताहिकी</u>

प्रियाः श्रोतारः, संस्कृतजगता सम्बद्धैः विभिन्नैः क्रियाकलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ.एम.गोल्ड-प्रवाहिकातः रविवासरे मध्याह्ने सार्धैक-वादनतः भविष्यति, भवन्तः सर्वे श्रोतुं प्रभवन्ति।

।। <u>इति वार्ता:</u>।।